श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.13- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥अथ त्रयोदशोऽध्यायः ॥**

**श्रीभगवानुवाच**

**सत्त्वं(म्) रजस्तम इति, गुणा बुद्धेर्न चात्मनः ।**
**सत्त्वेनान्यतमौ हन्यात्, सत्त्वं(म्) सत्त्वेन चैव हि ॥ 1॥**

सत्त्वे+ नान्+ यतमौ

**सत्त्वाद् धर्मो भवेद् वृद्धात्, पुं(म्)सो मद्भक्तिलक्षणः ।**
**सात्त्विकोपासया सत्त्वं(न्), ततो धर्मः(फ्) प्रवर्तते ॥ 2॥**

सात्त्विको+ पासया

**धर्मो रजस्तमो हन्यात्, सत्त्ववृद्धिरनुत्तमः ।**
**आशु नश्यति तन्मूलो, ह्यधर्म उभये हते ॥ 3॥**

सत्त्व+ वृद्धि+ रनुत्तमः

आगमोऽपः(फ्) प्रजा देशः(ख्), कालः(ख्) कर्म च जन्म च ।
ध्यानं(म्) मन्त्रोऽथ सं(म्)स्कारो, दशैते गुणहेतवः ॥ 4॥

तत्तत्सात्त्विकमेवैषां(यँ), यद् यद् वृद्धाः(फ्) प्रचक्षते ।
निन्दन्ति तामसं(न्) तत्तद्, राजसं(न्) तदुपेक्षितम् ॥ 5॥

तत्तत्+ सात्त्विक+ मेवैषां(यँ)

सात्त्विकान्येव सेवेत, पुमान् सत्त्वविवृद्धये ।
ततो धर्मस्ततो ज्ञानं(यँ), यावत् स्मृतिरपोहनम् ॥ 6॥

सात्त्विकान्+ येव , स्मृति+ रपोहनम्

वेणुसङ्घर्षजो वह्निर्- दग्ध्वा शाम्यति तद्वनम् ।
एवं(ङ्) गुणव्यत्ययजो, देहः(श्) शाम्यति तत्क्रियः ॥ 7॥

वेणु+ सङ्घर्षजो , गुण+ व्यत्+ ययजो

उद्धव उवाच

विदन्ति मर्त्याः(फ्) प्रायेण, विषयान् पदमापदाम् ।
तथापि भुञ्जते कृष्ण, तत् कथं(म्) श्वखराजवत् ॥ 8॥

पदमा+ पदाम् ,श्वखरा+ जवत्

श्रीभगवानुवाच

अहमित्यन्यथाबुद्धिः(फ्), प्रमत्तस्य यथा हृदि ।
उत्सर्पति रजो घोरं(न्), ततो वैकारिकं(म्) मनः ॥ 9॥

अह+ मित्यन्+ यथाबुद्धिः(फ्), उत्सर्+ पति

रजोयुक्तस्य मनसः(स्), सं(ङ्)कल्पः(स्) सविकल्पकः ।
ततः(ख्) कामो गुणध्यानाद्, दुःसहः(स्) स्याद्धि दुर्मतेः ॥10॥

गुण+ ध्यानाद्

करोति कामवशगः(ख्), कर्माण्यविजितेन्द्रियः ।
दुःखोदर्काणि सम्पश्यन्, रजोवेगविमोहितः ॥ 11॥

का+ मवशगः(ख्), कर्माण्य+ विजितेन्द्रियः ,
दुःखो+ दर्काणि ,रजोवेग+ विमोहितः

रजस्तमोभ्यां(यँ) यदपि, विद्वान् विक्षिप्तधीः(फ्) पुनः ।
अतन्द्रितो मनो युं(ञ्)जन्, दोषदृष्टिर्न सज्जते ॥ 12॥

दोष+ दृष्टिर्+ न

अप्रमत्तोऽनुयुं(ञ्)जीत, मनो मय्यर्पयञ्छनैः ।
अनिर्विण्णो यथाकालं(ञ्), जितश्वासो जितासनः ॥ 13॥

अप्रमत्तोऽ+ नुयुं(ञ्)जीत ,

मय्यर्+ पयञ्+ छनैः

एतावान् योग आदिष्टो, मच्छिष्यैः(स्) सनकादिभिः ।
सर्वतो मन आकृष्य, मय्यद्धाऽऽवेश्यते यथा ॥ 14॥

मच्+ छिष्यैः(स्), मय्यद्धाऽऽ+ वेश्यते

उद्धव उवाच

यदा त्वं(म्) सनकादिभ्यो, येन रूपेण केशव ।
योगमादिष्टवानेतद्, रूपमिच्छामि वेदितुम् ॥ 15॥

योगमा+ दिष्टवा+ नेतद्

श्रीभगवानुवाच

पुत्रा हिरण्यगर्भस्य, मानसाः(स्) सनकादयः ।
पप्रच्छुः(फ्) पितरं(म्) सूक्ष्मां(यँ), योगस्यैकान्तिकीं(ङ्) गतिम् ॥ 16॥

योगस्यै+ कान्तिकीं(ङ्)

सनकादय ऊचुः

गुणेष्वाविशते चेतो, गुणाश्चेतसि च प्रभो ।
कथमन्योन्यसं(न्)त्यागो, मुमुक्षोरतितितीर्षोः ॥ 17॥

गुणेष्+ वाविशते, कथमन्+ योन्य+ सं(न्)त्यागो ,

मुमुक्षो+ रतितितीर्+ षोः

श्रीभगवानुवाच

एवं(म्) पृष्टो महादेवः(स्), स्वयं(म्)भूर्भूतभावनः ।
ध्यायमानः(फ्) प्रश्नबीजं(न्), नाभ्यपद्यत कर्मधीः ॥ 18॥

स्वयं(म्)+ भूर्भूत+ भावनः, नाभ्य+ पद्यत

स मामचिन्तयद् देवः(फ्), प्रश्नपारतितीर्षया ।
तस्याहं(म्) हं(म्)सरूपेण, सकाशमगमं(न्) तदा ॥ 19॥

मा+ मचिन्तयद् ,प्रश्नपा+ रतितीर्+ षया ,सका+ शमगमं(न्)

दृष्ट्वा मां(न्) त उपव्रज्य, कृत्वा पादाभिवन्दनम् ।
ब्रह्माणमग्रतः(ख्) कृत्वा, पप्रच्छुः(ख्) को भवानिति ॥ 20॥

पादा+ भिवन्दनम् ,ब्रह्माण+ मग्रतः(ख्)

इत्यहं(म्) मुनिभिः(फ्) पृष्टस्- तत्त्वजिज्ञासुभिस्तदा ।
यदवोचमहं(न्) तेभ्यस्- तदुद्धव निबोध मे ॥ 21॥

तत्त्व+ जिज्ञासु+ भिस्तदा ,यदवो+ चमहं(न्), तदुद्+ धव

वस्तुनो यद्यनानात्व- मात्मनः(फ्) प्रश्न ईदृशः ।
कथं(ङ्) घटेत वो विप्रा, वक्तुर्वा मे क आश्रयः ॥ 22॥

यद्य+ नानात्व

पं(ञ्)चात्मकेषु भूतेषु , समानेषु च वस्तुतः ।
को भवानिति वः(फ्) प्रश्नो, वाचारम्भो ह्यनर्थकः ॥ 23॥

पं(ञ्)चात्+ मकेषु

मनसा वचसा दृष्ट्या, गृह्यतेऽन्यैरपीन्द्रियैः ।
अहमेव न मत्तोऽन्य- दिति बुध्यध्वमं(ञ्)जसा ॥ 24॥

गृह्यतेऽन्+ यैरपीन्+ द्रियैः,बुध्+ यध्व+ मं(ञ्)जसा

गुणेष्वाविशते चेतो, गुणाश्चेतसि च प्रजाः ।
जीवस्य देह उभयं(ङ्), गुणाश्चेतो मदात्मनः ॥ 25॥

गुणेष्वा+ विशते,गुणाश्+ चेतसि

गुणेषु चाविशच्चित्त- मभीक्ष्णं(ङ्) गुणसेवया ।
गुणाश्च चित्तप्रभवा, मद्रूप उभयं(न्) त्यजेत् ॥ 26॥

चाविशच्+ चित्त

जाग्रत् स्वप्नः(स्) सुषुप्तं(ञ्) च, गुणतो बुद्धिवृत्तयः ।
तासां(वँ) विलक्षणो जीवः(स्), साक्षित्वेन विनिश्चितः ॥ 27॥

यर्हि सं(म्)सृतिबन्धोऽय- मात्मनो गुणवृत्तिदः ।
मयि तुर्ये स्थितो जह्यात्, त्यागस्तद् गुणचेतसाम् ॥ 28॥

संसृति+ बन्धोऽय

अहं(ङ्)कारकृतं(म्) बन्ध- मात्मनोऽर्थविपर्ययम् ।
विद्वान् निर्विद्य सं(म्)सार- चिन्तां(न्) तुर्ये स्थितस्त्यजेत् ॥ 29॥

मात्मनोऽर्थ+ विपर्ययम् ,स्थितस्+ त्यजेत्

यावन्नानार्थधीः(फ्) पुं(म्)सो, न निवर्तेत युक्तिभिः ।
जागर्त्यपि स्वपन्नज्ञः(स्), स्वप्ने जागरणं(यँ) यथा ॥ 30॥

यावन्+ नानार् + थधीः(फ्),जागर्+ त्यपि, स्वपन्+ नज्ञः(स्)

असत्त्वादात्मनोऽन्येषां(म्), भावानां(न्) तत्कृता भिदा ।
गतयो हेतवश्चास्य, मृषा स्वप्नदृशो यथा ॥ 31॥

असत्त्वा+ दात्मनोऽन्+ येषां(म्),हेतवश्+ चास्य

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्,
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।
स्वप्ने सुषुप्त उपसं(म्)हरते स एकः(स्),
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ 32॥

बहि+ रनु+ क्षण+ धर्मिणोऽर्थान् ,समस्त+ करणैर्+ हृदि ,
स्मृत्यन्+ वयात्त्रि+ गुणवृत्ति+ दृगिन्द्रि+ येशः

एवं(वँ) विमृश्य गुणतो मनसस्त्र्यवस्था,
मन्मायया मयि कृता इति निश्चितार्थाः ।
सं(ञ्)छिद्य हार्दमनुमानसदुक्तितीक्ष्ण-
ज्ञानासिना भजत माखिलसं(म्)शयाधिम् ॥ 33॥

मनसस्+ त्र्यवस्था, हार्+ दमनुमा+ नसदुक्ति+ तीक्ष्ण, माखिल+ सं(म्)शयाधिम्

ईक्षेत विभ्रममिदं(म्) मनसो विलासं(न्),
दृष्टं(वँ) विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया,
स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ 34॥

विनष्ट+ मतिलो+ लमलात + चक्रम् ,विज्ञा+ नमेक+ मुरुधेव, स्वप्रस्+ त्रिधा

दृष्टिं(न्) ततः(फ्) प्रतिनिवर्त्य निवृत्ततृष्ण-
स्तूष्णीं(म्) भवेन्निजसुखानुभवो निरीहः ।
संदृश्यते क्व च यदीदमवस्तुबुद्ध्या,
त्यक्तं(म्) भ्रमाय न भवेत् स्मृतिरानिपातात् ॥ 35॥

प्रति+ निवर्+ त्यं(न्), भवेन्+ निजसुखा+ नुभवो
यदी+ दमवस्तु+ बुद्ध्या ,स्मृतिरा+ निपातात्

देहं(ञ्) च नश्वरमवस्थितमुत्थितं(वँ) वा,
सिद्धो न पश्यति यतोऽध्यगमत् स्वरूपम् ।
दैवादपेतमुत दैववशादुपेतं(वँ),
वासो यथा परिकृतं(म्) मदिरामदान्धः ॥ 36।।

नश्वर+ मवस्थित+ मुत्थितं(वँ), यतोऽ+ ध्यगमत् , दैवादपे+ तमुत,
दैव+ वशा+ दुपेतं(वँ), मदिरा+ मदान्धः

देहोऽपि दैववशगः(ख्) खलु कर्म यावत्,
स्वारम्भकं(म्) प्रतिसमीक्षत एव सासुः ।
तं(म्) स प्रपञ्चमधिरूढसमाधियोगः(स्),
स्वाप्नं(म्) पुनर्न भजते प्रतिबुद्धवस्तुः ॥ 37॥

दैव+ वशगः(ख्), प्रपञ्च+ मधिरूढ+ समाधियोगः(स्), प्रति+ बुद्ध+ वस्तुः

मयैतदुक्तं(वँ) वो विप्रा, गुह्यं(यँ) यत् सां(ङ्)ख्ययोगयोः ।
जानीत माऽऽगतं(यँ) यज्ञं(यँ), युष्मद्धर्मविवक्षया ॥ 38॥

मयै+ तदुक्तं(वँ), सां(ङ्)ख्य+ योगयोः, युष्मद्+ धर्म+ विवक्षया

अहं(यँ) योगस्य सां(ङ्)ख्यस्य, सत्यस्यर्तस्य तेजसः ।
परायणं(न्) द्विजश्रेष्ठाः(श्), श्रियः(ख्) कीर्तेर्दमस्य च ॥ 39॥

सत्यस्+ यर्+ तस्य, कीर्तेर्+ दमस्य

मां(म्) भजन्ति गुणाः(स्) सर्वे, निर्गुणं(न्) निरपेक्षकम् ।
सुहृदं(म्) प्रियमात्मानं(म्), साम्यासं(ङ्)गादयोगुणाः ॥ 40॥

साम्या+ सं(ङ्)गा+ दयो+ गुणाः

इति मे छिन्नसन्देहा, मुनयः(स्) सनकादयः ।
सभाजयित्वा परया, भक्त्यागृणत सं(म्)स्तवैः ॥ 41॥

तैरहं(म्) पूजितः(स्) सम्यक्, सं(म्)स्तुतः(फ्) परमर्षिभिः ।
प्रत्येयाय स्वकं(न्) धाम, पश्यतः(फ्) परमेष्ठिनः ॥ 42॥

परमर्+ षिभिः

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायां एकादशस्कन्धे त्रयोदशोऽध्यायः ॥ 13॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

